www.sgbauonline.com

AU–2318

# M.A. (Part—I) (Semester—II) Examination

## SANSKRIT

## Paper—5

## (Vedic Literature)

समय: — होरात्रयम्] [पूर्णाङ्का: — 80

सूचना :— उत्तराणि स्वीकृत माध्यमेन लिखत।

1. (अ) कयोरपि द्वयो: ऋचो: सविवरणम् अनुवादं कुरुत : 6

(ऋग्वेदे)

(i) य: शम्बरं पर्वतेषु क्षियन्तं
चत्वारिंश्यां शरद्यन्वविन्दत्।
ओजायमानं यो अहिं जघान
दानुं शयानं स जनास इन्द्र:।।

(ii) ऋतावरी दिवो अर्कैरबो-
ध्या रेवती रोदसी चित्रमस्थात्।
आयतीमग्न उषसं विभातीं
वाममेषि द्रविणं भिक्षमाण:।।

(iii) यस्य व्रते पृथिवी नन्नमीति
यस्य व्रते शफवज्जर्भुरीति।
यस्य व्रते ओषधीर्विश्वरूपा:
स न: पर्जन्य महि शर्म यच्छ।।

(ब) सविस्तरम् उत्तरं लिखत : 10

पर्जन्यसूक्तस्य सारं लिखत।

अथवा

इन्द्रदेवताया: महत्त्वं प्रतिपादयत।



www.sgbauonline.com

www.sgbauonline.com

(यजुर्वेदे च अथर्ववेदे)

2. (अ) कयोरपि द्वयोः ऋचोः सविवरणम् अनुवादं कुरुत : 6

(i) विश्वंभरा वसुधानी प्रतिष्ठा

हिरण्यवक्षा जगतो निवेशनी।

वैश्वानरं बिभ्रती भूमिरग्नि-

मिन्द्रऋषभा द्रविणे नो दधातु।।

(ii) येनेदं भूतं भुवनं भविष्य-

त्परिगृहीतममृतेन सर्वम्।

येन यज्ञस्तायते सप्तहोता

तन्मे मनः शिवसंकल्पमस्तु।।

(iii) स एव सं भुवनान्याभरत्

स एव सं भुवनानि पर्यैत्।

पिता सन्निभवत् पुत्र एषां

तस्माद् वै नान्यत् परमस्ति तेज।।

(ब) सविस्तरम् उत्तरं लिखत : 10

कालसूक्तस्य सारं लिखत।

अथवा

शिवसंकल्पसूक्तस्य महत्त्वं प्रतिपादयत।

(पाणिनीयशिक्षायाम्)

3. (अ) एकस्य प्रश्नस्य सविस्तरम् उत्तरं लिखत : 10

आभ्यन्तरस्य तथा च बाह्यप्रयत्नस्य सविस्तरं वर्णनं कुरुत।

अथवा

पाठकस्य गुणानां वर्णनं कुरुत।



www.sgbauonline.com

www.sgbauonline.com

(ब) टिप्पणीद्वयं लिखत : 6

(i) गायत्रीछन्द.

(ii) सङ्गीतशास्त्रे सप्तस्वरा:

(iii) अयोगवाहा:

(iv) अर्धमात्रा तु कण्ठस्य।

4. (अ) त्रयाणां वाक्यानां ससंदर्भस्पष्टीकरणं कुरुत : 12

(i) अथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति — प्रथनात् पृथिवीत्याहु:।

(ii) अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यते।

(iii) यदि मन्त्रार्थ प्रत्ययायानर्थकं भवतीति कौत्सौऽनर्थका हि मन्त्रास्तदेतेनोपेक्षितव्यम्।

(iv) एतावन्तो समानकर्माणो धातव:।

(v) मृगो न भीम: कुचरो गिरिष्ठ:।

(ब) निरुक्तानुसारेण निर्वचनं कुरुत (कयो: द्वयो:) : 4

(i) मृग:

(ii) दर्विहोमी:

(iii) स्थाणु:

(iv) जात्य:।

5. उचितं पर्यायं चित्वा लिखत (केऽपि षोडश) : 16

(1) पाणिनीयशिक्षायां कति विषया: सन्ति ?

(अ) पञ्च (ब) षट्

(क) अष्ट (ड) दश

(2) पाणिनीयशिक्षा कस्य वेदस्य सम्बन्धिता अस्ति ?

(अ) ऋग्वेद: (ब) सामवेद:

(क) यजुर्वेद: (ड) अथर्ववेद:



www.sgbauonline.com

www.sgbauonline.com

(3) कति वेदाङ्गानि सन्ति ?

(अ) सप्त (ब) अष्ट

(क) नव (ड) षट्

(4) संहिताग्रन्थाः कति सन्ति ?

(अ) द्वौ (ब) अष्ट

(क) चत्वारः (ड) एकः

(5) प्रमुखाः उपनिषद्ग्रन्थाः कति ?

(अ) द्वौ (ब) चत्वारः

(क) सप्त (ड) दश

(6) ऋग्वेदे कति सूक्तानि सन्ति ?

(अ) 1017 (ब) 4415

(क) 1820 (ड) 2009

(7) ऋग्वेदस्य वर्ण्यविषयः कः ?

(अ) यज्ञप्रक्रिया (ब) दर्शनशास्त्रम्

(क) समाज-जीवनम् (ड) देवतानां स्तवनम्

(8) यजुर्वेदीयस्य मन्त्रभागस्य किं नामधेयम् ?

(अ) ऋचा (ब) अनुवाक्

(क) सामः (ड) यजुष्

(9) यजुर्वेदस्य कति भागाः सन्ति ?

(अ) एकः (ब) द्वौ

(क) चत्वारः (ड) षट्

(10) सहस्रवर्त्मा कः ?

(अ) ऋग्वेदः (ब) यजुर्वेदः

(क) सामवेदः (ड) अथर्ववेदः



www.sgbauonline.com

www.sgbauonline.com

(11) पूर्वार्चिके कति प्रपाठका: सन्ति ?

(अ) षट् (ब) नव

(क) सप्त (ड) अष्टादश

(12) यज्ञो वै श्रेष्ठतमं किम् ?

(अ) ज्ञानम् (ब) कर्म

(क) पठनम् (ड) वचनम्

(13) काण्वशतपथ ब्राह्मणग्रन्थे कति अध्याया: सन्ति ?

(अ) 104 (ब) 402

(क) 507 (ड) 810

(14) अथर्ववेदस्य ब्राह्मणग्रन्थ: क: ?

(अ) शतपथ (ब) गोपथ

(क) तैत्तिरीय (ड) ऐतरेय

(15) शुक्लयजुर्वेदस्य आरण्यकं किम् ?

(अ) बृहदारण्यम् (ब) ऐतरेय

(क) कौषितकी (ड) सांखायन

(16) केनोपनिषद् कस्य ब्राह्मणग्रन्थस्य अंश: ?

(अ) शतपथ (ब) गोपथ

(क) तवलकर (ड) ऐतरेय

(17) मुण्डकोपनिषदि कति मुण्डका: सन्ति ?

(अ) 3 (ब) 8

(क) 15 (ड) 18

(18) वेदस्य अनुशीलनोपयोगि शास्त्रं किम् ?

(अ) वेदाङ्गा: (ब) आरण्यका:

(क) ब्राह्मणा: (ड) संहिता

(19) वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा का ?

(अ) शिक्षा (ब) कल्प

(क) छन्द: (ड) निरुक्त:

(20) कल्पसूत्रस्य कति विभागा: सन्ति ?

(अ) दश (ब) द्वादश

(क) चत्वार: (ड) पञ्च



www.sgbauonline.com

www.sgbauonline.com

www.sgbauonline.com